# प्रीबोर्ड प्रश्नपत्र-2021-22

## द्वितीयं सत्रम्

## कक्षा-दशमी

## संस्कृतम् (कोड-122)

समयः- होरात्रयम् सम्पूर्णाङ्काः - 40

सामान्यनिर्देशाः -

1) अस्मिन् प्रश्नपत्रे 9 प्रश्नाः सन्ति।

2) प्रश्नसंख्या प्रश्नपत्रानुसारम् एव लेखनीया ।

3) उत्तराणि संस्कृतेन लेखनीयानि।

वर्णनात्मकाः प्रश्नाः 40 अङ्काः

| | | |
|---|---|---|
| | अपठितावबोधनम् | |
| 1 | अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - | 10 |
| | यद्यपि अस्मिन् संसारे बहूनि वस्तूनि सन्ति, परं विद्या एव सर्वश्रेष्ठं धनम् अस्ति। विद्यया मानवः विनयशीलः भवति। विनयात् असौ पात्रतां प्राप्नोति,पात्रत्वात् धनं प्राप्नोति। धनाद् धर्मं कृत्वा एव सः सुखं लभते। सुप्रतिष्ठिते कुले समुत्पन्नः रूपयौवनसम्पन्नः जनः अपि यदि विद्यया हीनः भवति तदा समाजे सः सम्मानं न प्राप्नोति। विद्यया एव सः सर्वविधं ज्ञानं प्राप्य आत्मनः समाजस्य च उत्थानं करोति,लोके धनं कीर्तिं च प्राप्नोति। विद्या मानवस्य मातेव रक्षां करोति, पितेव हिते नियोजयति। विद्या वस्तुतः कल्पलता इव विद्यते। अन्यत् धनं व्यये कृते प्राप्नोति, परं विद्याधनं व्यये कृते वर्धते। अतः सत्यमेव उक्तम् -'विद्याधनं सर्वधनप्रधानम्'। | |
| 1 | एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) | 2 |
| | 1) मानवः कथं विनयशीलः भवति?<br>2) मानवः कस्मात् पात्रतां प्राप्नोति?<br>3) विद्याधनं कथं वर्धते? | |
| 2 | पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) | 4 |
| | 1) मानवः विद्यया कयोः उत्थानं करोति?<br>2) मानवः कदा सम्मानं न प्राप्नोति?<br>3) विद्या पितेव किं करोति? | |
| 3 | अस्य अनुच्छेदस्य कृते उचितं शीर्षकं संस्कृतेन लिखत - | 1 |
| 4 | यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्) | 3 |
| | 1) अनुच्छेदे 'दुःखम्' इति पदस्य विलोमपदं किं प्रयुक्तम् ?<br>2) 'लभते' इति कियापदस्य कर्तृपदम् किम्?<br>3) 'विनयशीलः' इति विशेषणपदस्य विशेष्यपदम् किम् अस्ति?<br>4) 'लोके' इति पदस्य पर्यायपदम् अनुच्छेदे किम् अस्ति? | |

| | | |
|---|---|---|
| | रचनात्मकं कार्यम् | |
| 2 | भवतः नाम शिवू अस्ति। भवतः विद्यालये संस्कृत-नाटकस्य प्रदर्शनं भविष्यति। एतदर्थं स्वमित्रं सत्यनारायणम् प्रति लिखितं निमन्त्रणं पत्रम् मञ्जूषायाम् प्रदत्तपदानाम् सहायतया पूरयित्वा लिखत । | 5 |
| | (1) ..............<br>तिथि ...............<br>प्रिय मित्र सत्यनारायण।<br>सप्रेम नमः,<br>नववर्षस्य (2).....................अत्र सर्वं कुशलम्। भवान् अपि कुशली इति मन्ये। अस्माकं विद्यालयस्य (3).....................नववर्षस्य शुभावसरे भविष्यति। तत्र अस्माकं (4)..............."रमणीया हि सृष्टिरेषा" इति (5) .................. प्रदर्शनम् भविष्यति। अहम् तस्मिन् नाटके मयूरस्य अभिनयं (6).....................। भवान् तत्दर्शनस्य (7).............. आगच्छतु। मम अपि (8) ..............भविष्यति। सर्वेभ्यः अग्रजेभ्यः मम (9) ..................निवेद्यताम् इति।<br>भवतः मित्रम्<br>(10).....................<br><br>मञ्जूषा- शिबू, शुभकामना, त्रिशूरतः, प्रणामान्, वार्षिकोत्सवः, नाटकस्य, विद्यालये, उत्साहवर्धनम्, करोमि, अत्र। | |
| 3 | प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानाम् सहायतया पञ्चवाक्यानि संस्कृतेन लिखत।<br><br><br><br>मञ्जूषा- देवालयस्य समीपम्, महिलायाः हस्ते, नरौ, तिष्ठति, फलानि, स्थाल्याम्, खगौ, वृक्षः, मिष्ठान्नानि, पूजकः, आपणं। | 5 |

| | | |
|---|---|---|
| | अथवा<br>मञ्जूषायाम् प्रदत्तपदानाम् सहायतया 'मम परिवारः' इति विषयम् अधिकृत्य संस्कृतैः पञ्चवाक्यानि लिखत ।<br><br>मञ्जूषा – पिता, माता, पितामही, अनुजः, भगिनी, सुन्दरम्, गृहम्, वाटिका, ग्रामे, वृक्षः, कृषकः, गृहिणी, मिलित्वा, निवसामः, अहम्, ज्येष्ठः। | |
| **4** | अधोलिखितानि वाक्यानि संस्कृतभाषयाम् अनूद्यताम् । (केवलं प्रश्नपञ्चकम्) | **5** |
| | (1) श्रीकृष्ण का मामा कंस था।<br>(2) पंजाब में पाँच नदियाँ बहती है।<br>(3) तुम कब खेलते हो?<br>(4) पिता खाने के लिए क्या लाते है?<br>(5) तुम सब चौर से डरते हो।<br>(6) मेरे साथ रमा गाती है। | |
| | पठितावबोधनम् | |
| **5** | अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – | |
| | आदेशं प्राप्य उभौ प्राचलताम्।तत्रोपेत्य काष्ठपटले निहितं पटाच्छादितं देहं स्कन्धेन वहन्तौ न्यायाधिकरणं प्रति प्रस्थितौ ।आरक्षी सुपुष्टदेहः आसीत्,अभियुक्तश्च अतीव कृशकायः। भारवतः शवस्य स्कन्धेन वहनं तत्कृते दुष्करम् आसीत्। स भारवेदनया क्रन्दति स्म।तस्य क्रन्दनं निशम्य मुदित आरक्षी तामुवाच– 'रे दुष्ट। तस्मिन् दिने त्वयाऽहं चोरिताया मञ्जूषाया ग्रहणाद् वारितः। इदानीं निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौराभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे' इति प्रोच्य उच्चैः अहसत्।यथाकथञ्चित् उभौ शवमानीय एकस्मिन् चत्वरे स्थापितवन्तौ। | |
| | एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) | **1** |
| | (1) कृशकायः कः आसीत्?<br>(2) उभौ कीदृशं देहं स्कन्धेन वहन्तौ न्यायाधिकरणं प्रति प्रस्थितौ?<br>(3) कः सुपुष्टदेहः आसीत्? | |
| | पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्) | **2** |
| | (1) मुदितः आरक्षी किम् उवाच?<br>(2) उभौ कुत्र शवं स्थापितवन्तौ?<br>(3) अभियुक्तः किमर्थम् क्रन्दति स्म? | |
| **6** | अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – | |
| | यः इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।<br>न कुर्यादहितं कर्म स परेभ्यः कदापि च।। | |
| | एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) | **1** |
| | (1) नरः कानि इच्छति?<br>(2) नरः कस्य श्रेयं इच्छति?<br>(3) कीदृशं कर्म मा कुरू? | |
| | पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्) | **2** |

| | | |
|---|---|---|
| | (1) सः केभ्यः अहितं कर्म न कुर्यात्?<br>(2) नरः किम् इच्छति?<br>(3) अहितं कर्म कदा न कुर्यात्? | |
| 7 | अधोलिखितं नाट्यांश पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – | |
| | वानरः-(सगर्वम्)अतएव कथयामि यत् अहमेव योग्यः वनराजपदाय। शीघ्रमेव मम राज्याभिषेकाय तत्पराः भवन्तु सर्वे वन्यजीवाः।<br>मयूरः- अरे वानर। तूष्णीं भव। कथं त्वं योग्यः वनराजपदाय?<br>पश्यतु पश्यतु। मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एवाहं पक्षिराजः कृतः। अतः वने निवसन्तं मां वनराजरूपेणापि द्रष्टुं सज्जाः भवन्तु। अधुना यतः कथं कोऽप्यन्यः विधातुः निर्णयम् अन्यथा कर्तुं क्षमः।<br>काकः-(सव्यङ्ग्यम्)अरे अहिभुक्। नृत्यातिरिक्तं का तव विशेषता यत् त्वां वनराजपदाय योग्यं मन्यामहे वयम्।<br>मयूरः- यतः मम नृत्यं तु प्रकृतेः आराधना।<br>पश्य। पश्य। मम पिच्छानामपूर्वं सौन्दर्यं। (पिच्छानुद्घाटय नृत्यमुद्रायां स्थितः सन्) न कोऽपि त्रैलोक्ये मत्सदृशः सुन्दरः। वन्यजन्तूनामुपरि आक्रमणं कर्तारं तु अहं स्वसौन्दर्येण नृत्येन च आकर्षितं कृत्वा वनात् बहिष्करिष्यामि। अतः अहमेव योग्यः वनराजपदाय। | |
| | एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) | 1 |
| | (1) मम नृत्यं तु प्रकृतेः आराधना इति कः वदति?<br>(2) कः सगर्व वदति?<br>(3) काकः कस्मै व्यङ्ग्यं करोति? | |
| | पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) | 2 |
| | (1) कस्य नृत्यं प्रकृतेः आराधना?<br>(2) मयूरस्य शिरसि राजमुकुटमिव किम् अस्ति?<br>(3) वानरः किमर्थं वन्यजीवान् तत्परान् भवितुं कथयति? | |
| 8 | मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत- | 2 |
| | स्वभावरौद्रमत्युग्रं क्रूरमप्रियवादिनम्।<br>उलूकं नृपतिं कृत्वा का नु सिद्धिर्भविष्यति।।<br>अन्वयः- स्वभावरौद्रम् (1)..............क्रूरम् (2)...........उलूकं नृपतिं (3)..............नु का (4)..............भविष्यति।<br><br>मञ्जूषा- सिद्धि, अप्रियवादिनम्, कृत्वा, अत्युग्रं।<br><br>अथवा<br>त्यक्त्वा धर्मप्रदां वाचं परूषां योऽभ्युदीरयेत्।<br>परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधी।।<br>भावार्थः- यः (1)...........धर्मयुक्तां वाणीं त्यक्त्वा धर्मविरूद्ध-कठोरवाण्या (2)...........करोति,सः तादृशः अज्ञानी भवति यथा कश्चन मधुरं पक्वं परित्यज्य अपक्वं (3)..............खादति अर्थात् सर्वदा सत्यं मधुरं प्रियं चैव | |

| | | |
|---|---|---|
| | (4).................परित्यजति।<br><br>मञ्जूषा- वक्तव्यम्, व्यवहारं, फलम्, मनुष्यः। | |
| 9 | अधोलिखितकथांशं समुचित-क्रमेण लिखत- | 4 |
| | (1) विविधा पक्षिणः अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति।<br>(2) तुच्छजीवैः आत्मनः एतादृश्या दुरवस्थया श्रान्तः सर्वजन्तून् दृष्ट्वा पृच्छति।<br>(3) एकः सिंहः सुखेन विश्राम्यते तदैव एकः वानरः आगत्य तस्य पुच्छं धुनोति।<br>(4) एवमेव वानराः वारं वारं सिंहम् तुदन्ति।<br>(5) क्रुद्धः सिंहः तं प्रहर्तुमिच्छति।<br>(6) क्रुद्धः सिंहः इतस्ततः धावति गर्जति च।<br>(7) तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति।<br>(8) परम् किमपि कर्तुमसमर्थः एव तिष्ठति। | |